Gyanshauryam, International Scientific Refereed Research Journal
© 2020 GISRRJ | Volume 3 | Issue 6 | ISSN : 2582-0095

# स्मृतिग्रन्थेषु गोतत्त्व विमर्शः

डॉ. नानूराम जाटः
रा. उ. प्रा. सं. विद्यालय माताजी भोपावास चौमूँ ,भारत।



**Article Info**
Volume 3 Issue 6
Page Number: 110-135
**Publication Issue :**
November-December-2020
**Article History**
Accepted : 01 Dec 2020
Published : 25 Dec 2020

**सारांशः**– प्रमाणस्य विषये पौराणिक साहित्यस्य एतस्मिन् विषये अध्ययनं आवश्यकं वर्तते। गोतत्त्वस्य विमर्शस्य विषये पुराणेषु अनेकानेकत्वेन विमर्श: प्रस्तूयन्ते। तेषां वर्णनम् तृतीयाध्याये वायुपुराणेव, पद्मपुराणे, अग्निपुराणे, ब्रह्मपुराणस्य विषयवस्तु ग्रहणम् कृतम्।

**मुख्यशब्दः**– गोतत्त्व, विमर्शः, पौराणिक, साहित्यस्य, स्मृतिग्रन्थः, धर्मशास्त्रं।

"श्रुतिस्तु वेदो विज्ञेयो धर्मशास्त्रं तु वै स्मृति:"[1] स्मृतिग्रन्थ: धर्मशास्त्रं भवति। तत्रापि मनुस्मृति: प्रथमा वर्तते। अस्य शास्त्रस्य प्रणेता स्वयं भगवान् मनुरस्ति। उक्तञ्च -

"स्वायम्भुवो मनु/मानिदं शास्त्रमकल्पयत्"[2]

स्मृतिग्रन्थेषु मनुस्मृते: प्राधान्यं सर्वै: आचार्यै: स्वीकृतम्। यथा -

मनुस्मृति विरुद्धा या सा स्मृति न प्रशस्यते।
वेदार्थोपनिबद्धत्वात् प्राधान्यं हि मनो: स्मृतेः।।

याज्ञवल्क्यस्मृते: व्याख्याकारो विज्ञानेश्वर: लिलेख

"यथा मनुप्रणीतं भृगु:"[3]

मुन्वादयो धर्मशास्त्रं धर्मे प्रमाणं भवति। या स्मृति: वेदमूला भवति सा एवं धर्मे प्रमाणभूता विद्यते। वेदविरुद्धा स्मृति धर्मे कदाचिदपि प्रमाणस्वरूपा नास्ति। तस्मादुक्तं च मनुना -

वेदोऽखिलो धर्ममूलं स्मृतिशीले च तद्विदाम्।
आचारश्चैव साधूनामात्मनस्तुष्टिरेव च।।[4]

तद्विदामित्यत्र वेदविदाम् इति बोध्यम्। उक्तञ्च हरिणा -

स्मृतयो बहुरूपाश्च दृष्टादृष्ट प्रयोजना:।
तमेवाश्रित्य लिङ्गेभ्यो वेदविद्भिः प्रकाशिता।।

स्मृतिग्रन्थस्य वैशिष्ट्यं सर्वत्र मनीषिभि: स्वीकृतम्। पूर्वमेवोक्तं स्मृति: धर्मशास्त्रमस्ति अतएव धर्मतत्वस्य वैशिष्ट्यनिरुपणाय शास्त्रमिदं प्रवृत्तम्। अस्माकं धर्मशास्त्रे गोसेवाया: माहात्म्यं सर्वत्र प्रतिपादितम्।

**Copyright :** © the author(s), publisher and licensee Technoscience Academy. This is an open-access article distributed under the terms of the Creative Commons Attribution Non-Commercial License, which permits unrestricted non-commercial use, distribution, and reproduction in any medium, provided the original work is properly cited

मनुस्मृतौ पशूनां सृष्टिविषये बहुधा निरुपितम्। अत्र तृतीयेऽध्याये समावर्तनानन्तरं गुरवे किंचित् देयम् भवति तस्य शिष्यस्य कर्तव्यं वर्तते गुरुदक्षिणा गुरो: प्रीत्यर्थं दद्यात्। तत्र किं दातव्यमिति जिज्ञासायामाह -

क्षेत्रहिरण्यं गामश्वं छत्रोपानहमासनम्।
धान्यं शाकं च वासांसि गुरवे प्रीतिमावहेत्।।[5]

अस्य श्लोकस्य व्याख्यायां कुल्लूकभट्टः मन्वर्थ मुक्तावल्यां प्राह - 'शक्त्या गुर्वर्थमाहरेत्'[6] इत्युक्त्वा क्षेत्रहिरण्यादिकं यथासामर्थ्यं विकल्पितं समुदितं वा गुरवे दत्वा तत्प्रतीतिमर्जयेत्। विकल्पपक्षे चान्ततोऽन्यासम्भवे छत्रोपानहमपि दद्यात् द्वन्द्वनिर्देशात् समुदितदानम्। श्लोकस्य पूर्वार्धे गोद्रव्यस्य चर्चाविद्यते अनेन विज्ञायते प्राचीनकाले विशिष्यमनुस्मृतिकाले समाजे गवां प्रसिद्धिरासीत्। तस्मात् भगवान् मनुः गुरुदक्षिणायां गोतत्वस्य वर्णनं कृतवान्।

पुन: तृतीयेऽध्याये विवाहप्रसंगे आर्ष विवाहस्य क्रम: आगच्छति। आर्षविवाहः गोदानपूर्वकं वर्णित:। वरपक्षात् गोमिथुनस्य ग्रहणमत्र प्रशस्तम्। अत्रेदं बोध्यं गोदानं लोभपूर्वकं नैव वर्तते। कन्यादानस्य महत्वसंपादनाय एष उपक्रमः।

उक्तञ्च मनुना -

एकं गोमिथुनं द्वे वा वरादादाय धर्मत:।
कन्याप्रदानं विधिवदार्षो धर्म: स उच्यते।।[7]

अयमर्थ: स्त्रीगवी पुंगोश्च गोमिथुनम्। तदेकम् द्वे वा वराद्धर्मत: धर्मार्थयोगादिसिद्धये, कन्यायै वा दातुं न तु शुल्कबुद्ध्या गृहीत्वा यथाशास्त्रं कन्यादानं स आर्षो विवाहो विधीयते।

चतुर्थेऽध्याये भगवान् मनुः प्रतिपादयामास यत् गौ: सर्वथा पूज्या भवति। यदि यात्रायां मार्गमध्ये कुत्रापि गौ: दृश्यते तत्र सावधानेन प्रदक्षिणं कृत्वा यात्रा संपादयेत्। विशेषरूपेण अधस्तनानां पदार्थानां विषये नियम: साधित: -

मृदं गां दैवतं विप्रं घृतं मधु चतुष्पथम्।
प्रदक्षिणानि कुर्वीत प्रज्ञातांश्च वनस्पतीन्।।[8]

अयं भाव: प्रस्थित: सन् सम्मुखावस्थितानुदघृतमृत्तिकागोपाषाणादि देवताब्राह्मणघृतक्षौद्र चतुष्पथमहाप्रमाणज्ञातवृक्षान्दक्षिणहस्त मार्गेण कुर्यात्। प्रदक्षिणानीति।

गोसेवायां दक्षिहस्तस्यैवोपयोगो भवति। विशिष्य गोगृहे गत्वा सदा दक्षिणं हस्तं बहिः कुर्यात्। वस्त्रादिभि: हस्तं तत्र नाच्छादयेत्। उक्तञ्च -

अग्न्यगारे गवां गोष्ठे ब्राह्मणानां च सन्निधौ।
स्वाध्याये भोजने चैव दक्षिणं पाणिमुद्धरेत्।।[9]

अयमर्थ: अग्निगृहे, गवां निवासे, ब्राह्मणानां गवां समीपे स्वाध्यायभोजनकालयोश्च दक्षिण पाणिं सवाहुं वासस उद्धरेत् वहिष्कुर्यात्।।

यदि गगौ: वत्सतरं वत्सतरी च दुग्ध पाययति तदा कस्मैचित् न ब्रूयात् –

न वारयेद्गां धयन्तीं न चा चक्षीत् कस्यचित्।
न दिवीन्द्रायुधं दृष्ट्वा कस्यचित् दर्शयेद्बुधः।।[10]

मनुस्मृतौ भगवान् मनु: ब्रूते आचार्यस्य यादृशीप्रतिष्ठा लोके भवति तादृशी गो: विषये जानीयात्। आचार्यादयो न कदापि हन्तव्या -तथैव गौर्न हन्तव्या -

आचार्यं न प्रवक्तारं पितरं मातरं गुरुम्।
न हिंस्याद् ब्राह्मणान्गाश्च सर्वांश्चैव तपस्विनः।।[11]

गो सेवायां ध्यानं दातव्यं भवति यत् गो: शरीरस्य पश्चाभाग: अतिशयेन शुद्धो मन्यते। परन्तु मुखं तथा न भवति। तस्मात् यस्मिन्नन्ने गौ: मुखं दद्यात् तदन्नं न भोजयेत् तद्यथा -

गवा चान्नमुपाघ्रातं घुष्टान्नं च विशेषतः।
गणान्नं गणिकान्नं च विदुषा च जुगुप्सितम्।।[12]

अस्मिन्नेवाध्याये दानस्य माहात्म्यं कथयन्नाह -

'अनडुहः श्रियं पुष्टां गोदो ब्रहनस्य विष्टपम्'[13]

अयं भाव: बलीवर्दस्य दाताप्रचुरां श्रियम् स्त्रीगवीप्रद: सूर्यलोकं प्राप्नोति।

पञ्चमेऽध्याये शुद्धाशुद्धिविचारप्रसंगे गोप्रसवे किञ्चित् प्रोक्तम्। गोप्रसवानन्तरं सहा: तस्या: दुग्धपानं न कुर्यात्। यावत् दशदिनानि न व्यतीतानि तावत् दुग्धपानमशुद्धं कथ्यते। दशादिनानां कालोत्र वर्तते। यथा -

अनिर्दशाया गो: क्षीरमौष्ट्रमैकशफं तथा।
आविकं संघिनीक्षीरं विवत्सायाश्च गो: पय:।।[14]

तथा च यम:

अनिर्दशाहं गोक्षीरमाज माहिषमेव च।

मृतवत्साया असन्निहितवत्सायाश्च क्षीरं वर्जयेत् धेन्वधिकरणन्यायेन वत्सग्रहणादेव गवि लब्धायां पुनर्गोग्रहणं गोरेव।

अपि च दुष्टभूमि संशोधनाय गव्यानामुपयोगो भवति। गोमयादिभिरुपलेपने न भूमि: शुद्धिः सम्भवति। प्राचीनकाले सर्वत्र व्यवहारस्थले गोमयेन उपलेपनं भवति स्म -

सम्मार्जनोपाञ्जनेन सेकेनोल्लेखनेन च।
गवां च परिवासेन भूमिः शुद्ध्यति पञ्चभिः।।[15]

अयमर्थ: अवकरशोधनेन गोमयाद्युपलेपनेन गोमूत्रोदकादिसेकेन खात्वा कतिपयमृदपनयनेन गवामहोरात्र निवासेन पञ्चभिरेकैकशो भूमि: शुद्ध्यति।

अत्रैव पुन: -

गौरमेध्या मुखे प्रोक्ता अजा मेध्या तत: स्मृता।
गो: पुरीषं च मूत्रं च मेध्यमित्यब्रवीन्मनुः।।[16]

मनुस्मृतौ अष्टमेऽध्याये साक्ष्यप्रसंगे विशिष्ट: प्रसंग: पठ्यते। ब्राह्मणो यदि साक्ष्यप्रद: भवति न्यायाधीश: तं ब्राह्मणं केवलं ब्रूहि इति ब्रूयात्। यदि क्षत्रिय: साक्षी भवति तत्र सत्यं ब्रूहि इति आदिशेत् वैश्यो यदि साक्ष्यप्रद: भवति तर्हि तं गोबीजसुवर्णापहारे यत्पापं तद्भतोऽनृताभिधाने स्यात्। शूद्रं पुन: सर्वैर्वक्ष्यमाणपापैः सम्बध्यसे यदि मृषा वदसीति पृच्छेत् यथा -

ब्रूरीति ब्राह्मणं पृच्छेत् सत्यं ब्रूहीति पार्थिवम्।
गोबीजकाञ्चनैर्वैश्यं शूद्रं सर्वैस्तु पातकैः।।[17]

अत्रैव पुनरग्रे साक्ष्यभाषणे यदि असत्यं वदति अवश्यमेव नरकं व्रजेत्। परन्तु मानवधर्मशास्त्रे पशु सम्बन्धी विवादे यदि कश्चिदनृतं कथयति तर्हि स साक्षी पञ्चबान्धवान् पूर्वजान् नरके योजयति तत्रैव यदि गोविषये असत्यं ब्रूते तत्र दशपूर्वजान् बान्धवान् नरके योजयति अर्थात् दशबान्धवानां हननफलमवाप्नोति। उक्तञ्च -

पञ्च पश्वनृते हन्ति दश हन्ति गवानृते।
शतमश्वानृते हन्ति सहस्रं पुरुषानृते।।[18]

तत्रैव शपथग्रहणे वैश्यानां कृते मनुः वदति -

गोबीजकाञ्चनैर्वैश्यम्[19]

अस्मिन्नेवाध्याये गवादिपशुविषये स्वामिनां पालानां व्यतिक्रमे जाते विवादं सम्यग्धर्म यथा तथा वदेत्। प्राचीनकाले गोपालकाख्यो भृत्य: धनादिकं परित्यज्य गोदुग्धमेव वेतनत्वेन स्वीकरोति तर्हि गवां मध्ये श्रेष्ठां गामेकां गां भृत्यर्थं दुह्यात् सा धनादि रहिते गोपाले भृति: स्यात् एवं च एकगवीक्षीरदानेव दश गा: पालयेत् -

गोप: क्षीरभृतो यस्तु स दुह्यात् दशतो वराम्।

गोस्वाम्यनुमते भृत्यः सास्यात् पालेऽभृते भृतिः।।[20]

गोविषये मनुमहाराजस्य दृष्टिः पृथक् वर्तते। सद्य प्रसूता धेनु: यदि सस्यभक्षणं कुर्यात् तर्हि गोपालको दण्डार्हो न भवति। तथा च चक्रत्रिशूलाङ्किता: पशव: यदि सस्यसम्पन्नं क्षेत्रं भक्षयेयु: तथापि पालकस्य नास्ति कश्चिद्दोषः। इमे पशव: समाजस्य परम्परां वोढुं समर्था: भवन्ति यथा -

अनिर्दशाहां गां सूतो वृषान्देवपशून्स्तथा।

सपालान्वा विपालान्वा न दण्ड्यान्मनुरब्रवीत्।।[21]

अत्रैव पुन: गोगजादिषु महत्सुप्राणिषु मारितेषु उत्तमसाहसस्याधु पञ्चशतपणो दण्डो भवेत् -

अर्धं गोगजोष्ट्रह्यादिषु।[22]

पशुचौरविषये च प्रायश्चित्तं कठिनं भणितम् परन्तु समाजे तादृशस्य प्रायश्चित्तस्य स्थानं न भवति। बहुत्र अङ्गानां क्षेदनं प्रोक्तम् तन्नोचित्तं सम्प्रति प्रतिभाति।

एकादशेऽध्याये महापातकिनां विचार प्रसंगे कुल्लूकभट्टस्य मन्वर्थमुक्तावल्यां शातातपस्य वचनं धृतं -

गोभूहिरण्यग्रहणे स्त्रीसंबन्धकृतेऽपि वा।

यमुद्दिश्य त्यजेत् प्राणां स्तमाहुर्ब्रह्मघातकम्।[23]

तत्रैव यो हि पुरुष: गोरक्षायां प्राणं त्यजति स ब्रह्महत्यापातकात् विमुक्तो भवति। अयं भाव: ब्रह्मवधस्य प्रायश्चितं वर्णानुरोधेन प्रतिपादितम्। परन्तु यदि गोरक्षायां नियतकालात् पूर्वमेव मृत्युं प्राप्नोति तथापि असौ तदोषात् मुक्तो भवति। उक्तञ्च -

ब्राह्मणार्थे गवार्थे वा सद्य: प्राणानपरित्यजेत्।

मुच्यते ब्रह्महत्याया गोप्ता गोर्ब्राह्मणस्य च।।[24]

प्रकान्ते द्वादशवार्षिकेन्तराग्न्युदकहिंसकाद्या क्रान्तब्राह्मणस्य गोर्वा परित्राणार्थं प्राणान् परित्यज्न् ब्रह्महत्यायामुच्यते। गोब्राह्मणं वा तत: परित्राणायामृतोप्यसमाप्तद्वादशवर्षोपि मुच्यते।

अस्मिन्नेवाध्याये प्रायश्चितव्यवस्थायां ब्राह्मणस्य कृते सुरापानस्य प्रायश्चितं निगदितम् यदिमोहात् ब्राह्मण: सुरापानं कृतवान् प्रायश्चितार्थ गोमूत्रं प्रतप्तं कृत्वा पाययेत्। दग्धे मुखे दग्धे शरीरे मृते वा सुरापानात् मुच्यते यथा -

गोमूत्रमग्निवर्णं वा पिबेदुदकमेव वा।

पयो घृतं वाऽमरणाद् गोशकृत्कृद्रसमेव वा ।।[25]

गोवधस्य प्रायश्चितं तत्रैव प्रतिपादितम्। प्रायश्चित्तमिदं उपपातकमध्ये स्वीकृतम्। उपपातकिनां च प्रायश्चित्तं कठिनमेव। यतोहि एतादृशानां पापानां गर्हितं स्थानमेव। सर्वप्रयत्नेन शासनं भवेत् तथा अन्यो जन: तस्य पापस्य पुनरावृत्तिं न कुर्यात्। शास्त्रे प्रायश्चित्तं दृढेन प्रोक्तमस्ति। गोवधस्य प्रायश्चित्ते सशिखं वपनं कारयित्वा तस्या: गो: चर्माद्राय तेन चर्मणा शरीरमाच्छाद्य यवचूर्णं जले संम्मेल्य पिबेत् मासपर्यन्तं एषो

विधिः। अनन्तरं मास द्वयपर्यन्तं गोमूत्रेण स्नपनं कारयित्वा जितेन्द्रिय भावेन सैन्धवेन लवणेन हविष्यान्नं पुन: गोसेवां प्रतिदिनं कुर्यात्। सर्वतो भावेन गोसेवाया: व्रतं चरेत्।

यथाचाह भगवान् मनुः -

उपपातक संयुक्तो गोघ्नोमासं यवान्पिबेत्।
कृतवापो वसेद्गोष्ठे चर्मणा तेन संवृतः।।
चतुर्थकालमश्नीयादक्षारलवणं मितम्।
गोमूत्रेणाचरेत् स्नानं द्वौ मासौ नियतेन्द्रियः।।
दिवानुगच्छेत् गास्तास्तु तिष्ठन्नूर्वं रज: पिबेत्।
शुश्रूषित्वा नमस्कृत्य रात्रौ वीरा सनं वसेत्।।
तिष्ठन्तीष्वनुतिष्ठेत्तु व्रजन्तीष्वप्यनुव्रजेत्।
आसीनासु तथाऽऽसीनो नियतो वीतमत्सरः।।
आतुरामभिशस्तां वा चौरव्याघ्रादिभिर्भयैः।
पतितां पङ्कलग्नां वा सर्वोपायैर्विमोचयेत्।।
उष्णे वर्षति शीते वा मारुते वाति वा भृशम्।
न कुर्वीतात्मनस्त्राणां गोरकृत्वा तु शक्तित:।।
आत्मनो यदि वान्येषां गृहे क्षेत्रेऽथवा खले।
भक्षयन्तीं न कथयेत् पिबन्तं चैव वत्सकम्।।
अनेन विधिना यस्तु गोहनो गामनुगच्छति।
स गोहत्याकृतं पापं त्रिभिर्मासैळपोहति।।[26]

तत्रैव पुन: प्रतिग्रहे च दोष: श्रूयते। असत् प्रतिग्रहस्य दोष: ब्राह्मणस्य कृते विशेषेण प्रोक्त:। अस्य प्रायश्चित्तमधस्तनेन श्लोकेन -

जपित्वा त्रीणि सावित्र्या: सहस्राणि समादितः।
मासं गोष्ठे पय: पीत्वा मुच्यतेऽसत्प्रतिग्रहात्
उपवासकृशं तं तु गोव्रजात् पुनरागतम्।
प्रणतं प्रति पृच्छेयु: साम्यं सौम्येच्छसीति किम्।।
सत्यमुक्त्वा तु विप्रेषु विकिरेघवसं गवाम्।
गोभि: प्रवर्तिते तीर्थे कुर्युस्तस्य परिग्रहम्।।[27]

मनुस्मृतौ बहुविधानि व्रतानि निर्दिष्टानि। तेषु व्रतेषु 'कृच्छ्रसान्तपनं' व्रतं प्रसिद्धम्। तत्र पञ्चगव्येन व्रतमिदं पूर्ण भवति तद्यथा -

गोमूत्रं गोमयं क्षीरं दधिसर्पि: कुशोदकम्।
एकरात्रोपवासश्च कृच्छ्रे सांतपनं स्मृतम्।।[28]

पराशरस्मृतौ गृहस्थधर्ममीमांसायां गोवृषाणां च महत्वं निगदितम्। कृषिकर्म प्राचीनभारतस्य प्रमुखं आसीत्। तत्रापि धनाढ्यानां कृते इदं कर्म प्रशस्तम्। विशिष्य वेदविद्यायां यो हि पारंगत: विद्वान् भवति तस्य कृते कृषिकर्म आवश्यकम् आसीत्। तत्रापि ब्राह्मणानां कृते प्रशस्तमिदं कर्म श्रूयते।

उक्तञ्च

षट्कर्म निरतो विप्रः कृषिकर्माणि कारयेत्।[29]

वेदविद्यायां संलग्नो विप्र: जीवनाय अन्नोत्पादनं कुर्यात्। पराशरस्य मते यावत् पर्यन्तमन्नं वर्षपर्यन्तं भुंक्ते तावत् अवश्यमेव साधयेत्। पुन: -

हलमष्टगवं धर्न षडगवं मध्यमं स्मृतम्।
चतुर्गवं नृशंसानां द्विगवं वृषघातिनाम्।।
शुधितं वृषितं श्रान्तं वलीवर्द्धं न योजयेत्।
हीनाङ्गं व्याधितं क्लीबं वृषं विप्रोन वाह्येत्।।
स्थिराङ्गं नीरुजं दृप्तं वृषभं षण्डवर्जितम्।
वाह्येद्दिवसस्यार्द्धं पश्चात् स्नानं समाचरेत्।।[30]

पराशरस्मृतौ अष्टमेऽध्याये प्रायश्चित् प्रसंगे बन्धने यदि गवां मृत्युभवति तर्हि किं कर्तव्यम् अकामत: कामतो वापि। बहुभि: श्लोकैः प्रायश्चित्तं वर्णितम् –

गवां बन्धानयोक्त्रेतु भवेन्मृत्युरकामतः।
अकामात् कृतपापस्य प्रायश्चित्तं कथं भवेत्।।
वेदवेदाङ्गविदुषां धर्मशास्त्रं विजानताम्।
स्वकर्मरत विप्राणां स्वकं पापं निवेदयेत्।।[31]

अस्य सामान्येन प्रायश्चित्तं इदं प्रोक्तम् -

सशिखं वपनं कृत्वा त्रिसन्ध्यमवगाहनम्।
गवां गोष्ठे वसेद्रात्रौ दिवा ताः समनुव्रजेत्।।
उष्णे वर्षसि शीते वा मारुते वाति वा भृशम्।
न कुर्वीतात्मनस्त्राणं गोरकृत्वा तु शक्तितः।।
गोवधस्यानुरूपेण प्राजापत्यं विनिर्दिशेत्।
प्राजापत्यं तु यत्कृच्छं विभजेत्तच्चतुर्विधम्।।
प्रायश्चिते ततश्चीर्णे कुर्याद् ब्राह्मणभोजनम्।
विप्राय दक्षिणां दद्यात् पवित्राणि जपेट्विजम्।।
ब्राह्मणान् भोजयित्वा तु गोहनः शुद्धो न संशयः।।[32]

पराशरस्मृतौ नवमेऽध्याये गोसेवाया: विस्तृतं वर्णनं प्राप्यते।

गवां संरक्षणार्थाय न दुष्येद्रोधबन्धयोः।
तद्धन्तु न तं विद्यात् कामात् कामकृतन्तथा।।1।।
अङ्गुष्ठमात्र: स्थूलो वा बाहुमात्र: प्रमाणतः।
आर्द्रस्तु सपलाशश्च दण्ड इत्यभिधीयते।।2।।
दण्डादूर्द्ध यदन्येन प्रहरेद्वा निपातयेत्।
प्रायश्चित्तं चरेत् प्रोक्तं द्विगुणं गोव्रतश्चरेत्।।3।।
रोधबन्धनयोक्ताणि घातनञ्च चतुर्विधम्।

एकपादञ्चरेद्रोधे द्विपादं बन्धने चरेत्।।4।।
योक्त्रेषु पादहीनं स्याञ्चरेत् सर्वं निपातने।
गोचारे च गृहे वापि दुर्गेष्वपि समेष्वपि।।5।।
नदीष्वपि समुद्रेषु खातेऽप्यथ दरीमुखे।
दग्धदेशे स्थिता: गाव: स्तम्भनाद्रोध उच्यते।।6।।
योक्त्रदामकडोरैश्च घण्टाभरणभूषणैः।
गृहे वापि वने वापि बद्धा स्याद्गौता यदि।।7।।
तदेव बन्धनं विद्यात् कामाकामकृतञ्च यत्।
मृल्लेखे शकटे पंक्तौ भारे वा पीडितो नरैः।।8।।
गोपतिर्मृत्युमाप्नोति योक्त्रो भवति तद्वधः।
मत्त: प्रमत्त उन्मत्तश्चेतनो वाप्यचेतनः।।9।।
कामाकामकृतक्रोधोदण्डैर्हन्यदथोपलैः।
प्रहता वा मृता वापि तदिभ हेतुर्निपातने।।10।
मूछित: पतितो वापि दण्डेनाभिहत: स तु।
उत्थितस्तु यदा गच्छेत् पञ्च सप्त दशैव वा।।11।।
प्रासं वा यदि गृह्णीयात्तोयं वापि पिवेद्यदि।
पूर्वध्युपसृष्टश्चेत् प्रायश्चित्तं न विद्यते।।12।।
पिण्डस्थे पादमेकन्तु द्वौ पादौ गर्भसम्मिते।
पादोनं व्रतमुद्दिष्टं हत्वा गर्भमचेतनम्।।13।।
पादेऽङ्गरोमवपनं द्विपादे श्मश्रूणोऽपि च।
त्रिपादे तु शिखावर्जं सशिखन्तु निपातने।।14।
पादे वस्त्रयुगन्चैव द्विपदे कांस्यभाजनम्।
पादोने गोवृषं दद्याञ्चतुर्थे गोद्वयं स्मृतम्।।15।।
भिष्पन्नसर्वगात्रन्तु दृश्यते वा सचेतनम्।
अङ्गप्रत्यङ्गसम्पन्ने द्विगुणं गोव्रतं चरेत्।।16।।
पाषाणे नैव दण्डेन गावो येनाभिघातिता:।
शृङ्गभृङ्गे चरेत् पादं द्वौ पादौ तेन यातने।।17।।
लाङ्गुले कृच्छ्रपादन्तु द्वौ पादावस्थिभञ्जने।
त्रिपादष्चैव कर्णे तु चरेत् सर्वं निपातने।।18।।
शृङ्गभृङ्गेऽस्थिभङ्गे च कटिभङ्गे तथैव च।
यदि जीवति षण्मासान् प्रायश्चित्तं न विद्यते।।19।।
क्षणभङ्गे च कर्तव्य: स्नेहाभ्यङ्गस्तु पाणिना।
षदसव्यापहर्तव्यो यावद्दृढबलो भवेत्।।20।।

यावत्सम्पूर्णसर्वाङ्गस्तावत्तं पोषयेन्नरः।
गोव्यं ब्राह्मणस्याग्रे नमस्कृत्य विवर्जयेत्।।21।।
यद्यसम्पूर्णसर्वाङ्गो हीनदेहो भवेत्तदा।
गोघातकस्य तस्यार्द्ध प्रायश्चित्तं विनिर्दिशेत्।।22।।
काष्ठलोष्ट्रकपाषाणैः शस्त्रेणैवोद्धतो बलात्।
व्यापादयति यो गान्तु तस्य शुद्धिं विनिर्दिशेत्।।23।।
चरेत् सान्तपनं काष्ठे प्राजापत्यन्तु लोष्ट्रके।
तप्तकृच्छ्रन्तु पाषाणे शस्त्रे चैवातिकृच्छ्रकम्।।24।।
पञ्च सान्तपने गावः प्राजापत्ये तथा त्रयः।
तप्तकृच्छ्रे भवेन्त्यष्टावतिकृच्छ्रे त्रयोदश।।25।।
प्रमापणे प्राणभृतां दद्यात्तत्प्रतिरूपकम्।
तस्यानुरूपं मूल्यं वा दद्यादित्यब्रवीन्मनुः।।26।।
अन्यत्राङ्कनलक्ष्मभ्यां वाहने माहने तथा।
सायं संयमनार्थन्तु न दुष्येद्रोधबन्धयोः।।27।।
अतिदाहेऽतिवाहे च नासिकाभेदने तथा।
नदीपर्वतसञ्चारे प्रायश्चित्तं विनिर्दिशेत्।।28।।
अतिदाहे चरेत्पादं द्वौ पादौ वाहने चरेत्।
नासिके पादहीनं तु चरेत्सर्वं निपातने।।29।।
दहनाञ्च विपद्येत अबद्धो वापि यन्त्रितः।
उक्तं पाराशरेणैव ह्येकपादं यथाविधि।।30।।
रोधवन्धनयोक्त्रञ्च भारः प्रहरणन्तथा।
दुर्गप्रेरणयोक्त्रञ्च निमित्तानि बधस्य षट्।।31।।
बन्धप्राशसुगुप्ताङ्गो म्रियते यदि गोपशुः।
भवने तस्य नाशस्य पापं कृच्छ्रार्द्धमर्हति।।32।।
न नारिकेलैनच शाणबालै -
नचापि मौजेन च बन्धशृङ्खलैः।
एतैस्तु गावो न निबन्धनीया -
बद्धास्तु तिष्ठेत् परशुं गृहीत्वा।।33।।
कुशैः काशैश्च बध्नीयाद्गोपशुं दक्षिणामुखम्।
पाशलग्नादिदग्धेषु प्रायश्चित्तं न विद्यते।।34।।
यदि तत्र भवेत् काण्डं प्रायश्चित्तं कथं भवेत्।
जपित्वा पावनी देवीं मुच्यते तत्र किल्विषात्।।35।।
प्रेरयन् कूपवापीषु वृक्षच्छेदेषु पातयन्।

गवाशनेषु बिक्रीणंस्ततः प्राप्नोति गोबधम्।।36।।
आराधितस्तु यः कश्चिद्भिन्नकक्षो यदा भवेत्।
श्रवणं हृदयं भिन्नं मग्नौ वा कूटसङ्कटे।।37।।
कूपादुत्क्रमणे चैव भग्नो वा ग्रीवपादयोः।
स एव म्रियते तत्र त्रीन् पादांस्तु समाचरेत्।।38।।
कूपखाते तटीबन्धे नदीबन्धे प्रपासु च।
पानीयेषु विपन्नानां प्रायश्चित्तं न विद्यते।।39।।
कूपखाते तटीखाते दीर्घखाते तथैव च।
अन्येषु धर्मपातेषु प्रायश्चित्तं न विद्यते।।4।।
वैशमद्वारे निवासेषु यो नरः खातमिच्छति।
स्वकार्यगृहखातेषु प्रायश्चित्तं विनिर्दिशेत्।।41।।
निशि बन्धनिरुद्धेषु सर्पव्याघ्रहतेषु च।
अग्निविद्युद्विपन्ननां प्रायश्चित्तं न विद्यते।।42।।
ग्रामघाते शरौघेण वेश्मबन्धनिपातने।
अतिवृष्टिहतानाञ्च प्रायश्चित्तं न विद्यते।।43।।
संग्रामे प्रहतानाञ्च ये दग्धा वेश्मकेषु च।
दावाग्निं ग्रामघाते वा प्रायश्चित्तं च विद्यते।।44।।
यन्त्रिता गौश्चिकित्सार्थं मूढगर्भविमोचने।
यत्ने कृते विपद्येत प्रायश्चित्तं न विद्यते।।45।।
व्यापन्नानां बहूनाञ्च बन्धने रोधने ऽपिवा।
भिग्मिथ्याप्रचारे च प्रायश्चित्तं विनिर्दिशेत्।।46।।
गोवृषाणां विपत्तौ च यावन्तः प्रेक्षका जनाः।
न वारयन्ति तां तेषां सर्वेषां पातकं भवेत्।।47।।
एको हतोर्यर्बहुभिः समेतै -
नज्ञायते यस्य हतोऽभिधानात्।
दिव्येन तेषामुपलभ्य हन्ता
निवर्तनीयो नृपसन्नियुक्तैः।।48।।
एका चेद्बहुभिः कापि दैवाद्व्यापादिता भवेत्।
पादं पादश्च हत्यायाश्चरेयुस्ते पृथक् पृथक्।।49।।
हतेषु रुधिरं दृश्यं व्याधिग्रस्तः कृशो भवेत्।
नाना भवति दृष्टेषु एवमन्वेषणं भवेत्।।50।।
मनुना चैवमेकेन सर्वशास्त्राणि जानता।
प्रायश्चित्तन्तु तेनोक्तं गोषु चान्द्रायणं चरेत्।।51।।

केशानां रक्षणार्थाय द्विगुणं गोव्रतं चरेत्।
द्विगुणे व्रत आदिष्टे दक्षिणा द्विगुणा भवेत्।।52।।
राजा वा राजपुत्रो वा ब्राह्मणो वा बहुश्रुतः।
अकृत्वा वपनं तस्य प्रायश्चित्तं विनिर्दिशेत्।।53।।
यस्य न द्विगुणं दानं केशश्च परिरक्षितः।
तत्पापं तस्य तिष्ठेत वक्ता च नरकं ब्रजेत्।।54।।
यत्किञ्चित् क्रियते पापं सर्वकेशेषु तिष्ठति।
सर्वान् केशान् समुद्धृत्य च्छेदयेदङ्गुलिद्वयम्।।55।।
एवं नारीकुमारीणां शिरसो मुण्डनं स्मृतम्।
न स्त्रिया: केशवपनं न दूरे शयनाशनम्।।56।।
न च गोष्ठे वसेद्रात्रौ न दिवाली गा अनुब्रजेत्।
नदीषु सङ्गमे चैव अरण्येषु विशेषत:।।57।।
न स्त्रीणामजिनं वासो व्रतमेवं समाचरेत्।
त्रिसन्ध्यं स्नानमित्युक्तं सुराणामर्चनं तथा।।58।।
बन्धुमध्ये ब्रतं तासां कृच्छ्रचान्द्रायणादिकम्।
गृहेषु नियतं तिष्ठेच्छुचिनियममाचरेत्।।59।।
इह यो गोबधं कृत्वा प्रच्छादयितुमिच्छति।
स याति नरकं धीरं कालसूत्रमसंशयम्।।60।।
विमुक्तो नरकात्तस्मान्मर्त्यलोके प्रजायते।
हीवो दु:खी च कुष्ठी च सप्त जन्मानि वै नर:।।61।।
तस्मात् प्रकाशयेत् पापं स्वधर्मं सततं चरेत्।
स्त्रीवालभृत्यगोविप्रेष्वतिकोपं विवर्जयेत्।।62।।

प्रायेण द्विषष्टिश्लोकै: गवां विशिष्टं महत्वं ऋषिणा उपबृंहितम्। एतेषां श्लोकानां अस्माकं समाजे प्राथम्येन प्रतिष्ठा वर्तते। इदं सत्यमस्ति यत् समग्रेदेशे अस्या: स्मृते: विभागश: परिपालनं दृश्यते। पराशरस्य मतं वर्तमानकाले प्रासंगिकं विभाति। एते श्लोका: मार्गदर्शका एव सन्ति। एतेषां श्लोकानां यदि गभीरं अध्ययनं भवेत् अथवा शोधकार्यं भवेत् निश्चितं मन्ये एकस्य शोधप्रबन्धनस्य सम्भारा: अत्र विद्यन्ते। एकस्मिन् श्लोके अनेके विषया: नियमा:, लाभा:, अङ्गीकृता:। गोशालायां आदर्शश्लोके एतेषां अङ्कनं स्यात् पठित्वा पाठक: मार्गदर्शनं प्राप्स्यति। बृहत्पराशरस्मृतौ पञ्चमेऽध्याये गोमहिम्न: वर्णनं विस्तरेण प्राप्यते। अत्र त्रिचत्वारिंशच्छलोका: क्रमेण पठिता: सन्ति। अत्रापि ब्राह्मणानां विशिष्य वेदज्ञानां कृते कृषिकर्म प्रामुख्यम् अस्ति -

'षट्कर्मसहितो विप्रः कृषिवृत्तिं समाश्रयेत्।"[33] गवां दर्शनं पुण्यप्रदं स्पर्शनं च शमनाय पापस्य तथा गोभि: प्रदत्तधनै: इह लोके परलोके च सुखाय कल्प्यते।

उक्तञ्च -

स्पृष्टाश्च गाव: शमयन्ति पापं
संसेविताश्चोपनयन्ति वित्तम्।

ता एव दत्तास्त्रिदिवं नयन्ति

गोभिर्न तुल्यं धनमस्ति किञ्चित्।।[34]

अस्यां गवि सर्वाङ्गेषु देवतानां निवास: वर्तते। सर्वेषां पापानां शमनाय: तथा सर्वविधकल्याणाय च गौसेवा विधेया। श्लोकानां महत्वं विशिष्टमत्र अत एव सर्वे श्लोका: प्रबन्धस्य महत्वप्रकटनाय अध: प्रदर्श्यन्ते।

तद्यथा -

अत: परं कर्माचारं कलौ युगे।

वर्ण साधारणं साक्षाच्चातुर्वर्ण्यक्रमेण तु।।

अत: परं गृहस्थस्य कर्माचारं कलौ युगे।

वर्णसाधारणं साक्षाञ्चातुर्वर्ण्यक्रमेण तु।।1।।

युष्माकं सम्प्रवक्ष्यामि पराशरवचोदितम्।

षट्कर्मसहितो विप्र: कृषिवृत्तिं समाश्रयेत्।।2।।

हीनाङ्गं व्याधिसंयुक्तं प्राणहीनं च दुर्बलम्।

क्षुद्युक्तं तृषितं श्रान्तमनडाहं न वाह्येत।।3।।

स्थिराङ्गं नीरुजं तृप्तं साण्डं षण्ढविवर्जितम्।

अधृष्यं सबलप्राणमनड्वाहं तु वाहयेत्।।4।।

वाहयेद् दिवस्याध तत: स्नानं समाचरेत्।

कुगवैर्न कृषि कुर्यात् सर्वथा धेनुसंग्रहम्।।5।।

बन्धनं पालनं रक्षां द्विजः कुर्याद्गृही गवाम्।

वत्साश्च यत्नतो रक्ष्या वर्धन्ते ते यथा क्रमात्।।6।।

न दूरे तास्तु नेतव्याश्चारणाय कदाचन।

दूरे गावश्चरन्त्यो हि न भवन्ति शुभावहाः।।7।।

प्रातरेव हि दोग्धव्या दुह्यात् सायं न ता गृही।

दोग्धुर्द्विः पयसो नैव वर्धन्ते ता: कदाचन।।8।।

अनादेयतृणान्यत्त्वा स्रवन्त्यनुदिनं पय:।

तुष्टिदा देवतादीनां पूज्या गाव: कथं न ता:।।9।।

स्पृष्टाश्च गाव: शमयन्ति पापं संसेविताश्चोपनयन्ति वित्तम्।

ता एव दत्तास्त्रिदिवं नयन्ति

गोभिर्न तुल्यं धनमस्ति किचित्।।10।

यस्याः शिरसि ब्रह्माऽऽस्ते स्कन्धदेशे शिव: स्थितः।

पृष्ठे नारायणस्तस्थौ श्रुतयश्चरणेषु च।।11।

या अन्या देवता: काश्चित्तस्या लोमसु ता: स्थिताः।

सर्वदेवमया गावतुष्यत्तेद्भक्तितो हरिः।।12।।

हरन्ति स्पर्शनात् पापं पयसा पोषयन्ति या:।

प्रापयन्ति दिवं दत्ताः पूज्या गाव: कथं न ता:।।13।।
यत्खुराहतभूमेर्ये उत्पद्यन्ते रज: कणाः।
प्रलीनं पातकं तैस्तु पूज्या गाव: कथं न ता:।।14।।
शकृन्मूत्रं हि यस्यास्तु पीतं दहति पातकम्।
किमपूज्यं हि तस्या गोरिति पाराशरोऽब्रवीत्।।15।।
गौरवत्सा न दोग्धव्या न चैवं गर्भसन्धिनी।
प्रसूता च दशाहार्वाग्दोग्धि चेन्नरकं व्रजेत्।।16।।
दुर्बला व्याधिसंयुक्ता पुष्पिता या द्विवत्सका।
साधुभिर्न च दोग्धव्या धार्मिकैर्धनमीप्सीभिः।।17।।
कुलान्ते पुष्पिता गाव: कुलान्ते बहवस्तिला:।
कुलान्ते चलचित्ता स्त्री कुलान्ते बन्धुविग्रहः।।18।।
एकत्र पृथिवी सर्वा सशैल-वन-कानना।
तस्या गौायसी साक्षादेकत्रोभयतोमुखी।।19।।
यथोक्तविधिना चैता वर्ग: पाल्या: सुपूजिता:।
पालयन् पूजयन्नेता: स प्रेत्येह च मोदते।।20।।
दक्षिणाभिमुखा गाव उत्तराभिमुखा अपि।
बन्धनीयास्तथैता: स्युर्न प्राक्-पश्चिमतोमुखाः।।21।।
वाजि-गो-वृषशालायां सुतीक्ष्णं लोहदात्रकम्।
स्थाप्यं तु सर्वदा तत् स्यादवलुप्तविमोक्षकृन्।।22।।
गावो देया: सदा रक्ष्या: पाल्या: पोष्याश्च सर्वदा।
ताडयन्ति च ये तापा ये चाक्रोशन्ति ता नराः।।23।।
नरकाग्नौ प्रपच्यन्ते गोनिश्वासप्रपीडिताः।
सपलाशेन शुष्केण ता दण्डेन निर्वतयेत्।।24।।
गच्छ गच्छेति तां ब्रूयान् मा मा भैरिति वारयेत्।
संस्पृशन् गां नमस्कृत्य कुर्यात्तां च प्रदक्षिणम्।।25।।
प्रदक्षिणीकृता तेन सप्तद्वीपा वसुन्धरा।
तृणोदकादिसंयुक्तं य: प्रदद्याद्गवाहिकम्।।26।।

सोऽश्वमेधसमं पुण्यं लभते नात्र संशयः।
गवां कण्डूयनं स्नानं गवां दानसमं भवेत्।।27।।
तुल्यं गोशतदानस्य भयतो गां प्रपाति यः।
पृथिव्यां यानि तीर्थानि आसमुद्रं सरांसि च।।28।।
गवां शृङ्गोदकस्नानकलां नार्हन्ति षोडशीम्।

पातकानि कुतस्तेषां येषां गृहमलंकृतम्।।29।।

सततं बालवत्साभिर्गोभि: श्रीभिरिव स्वयम्।

ब्राह्मणाश्चैव गावश्च कुलमेकं द्विधा कृतम्।।30।।

तिष्ठन्त्येकत्र मन्त्रास्तु हविरेकत्र तिष्ठति।

गोभिर्यज्ञा: प्रवर्तन्ते गोभिर्देवा: प्रतिष्ठिता:।।31।।

गोभिर्वेदा: समुद्गीर्णा: षडगा: सपद-क्रमा:।

सौरभेयास्तु यस्याग्रे पृष्ठतो यस्य ता: स्थिता:।।32।।

वसन्ति हृदये नित्यं तासां मध्ये वसन्ति ये।

ते पुण्यपुरुषा: क्षीण्यां नाकेऽपि दुर्लभाश्च ते।।33।।

ये गोभक्तिकरा नित्यं भवन्ते ये च गोप्रदा:।

शृङ्गमूले स्थितो ब्रह्मा शृङ्गध्ये तु केशवः।

शृङ्गाग्रे शंकरं विद्यात्त्रयो देवा: प्रतिष्ठिता:।।34।।

शृङ्गाग्रे सर्वतीर्थानि स्थावराणि चराणि च।

सर्वे देवा: स्थिता देहे सर्वदेवमयी हि गौः।।35।।

ललाटाग्रे स्थिता देवी नासामध्ये तु षण्मुखः।

कम्बलाऽश्वतरौ नागौ तत्कर्णाभ्यां व्यवस्थितौ।।36।।

स्थितौ तस्याश्च सौरभ्याश्चक्षुषो: शशिभास्करौ।

दन्तेषु वसवश्चाष्टौ जिह्वायां वरुण: स्थितः।।37।।

सरस्वती च हुंकारे यम-यक्षौ च गण्डयो:।

ऋषयो रोमकूपेषु प्रस्नावे जाह्नवीजलम्।।38।।

कालिन्दी गोमये तस्या अपरा देवतास्तथा।

अष्टाविंशतिदेवानां कोट्यो लोमसु ता: स्थिताः।।39।।

उदरे गार्हपत्योऽग्निर्हृदये दक्षिणस्तथा।

मुखे चाहवनीयस्तु सभ्याऽऽवसथ्यौ च कुक्षिषु।।40।।

एवं यो वर्तते गोषु ताडनक्रोधवर्जितः।

महतीं श्रियमाप्नोति स्वर्गलोके महीयते।।41।।

कुलं तस्या न शङ्केत पूतिगन्धं न वर्जयेत्।

यावत् पिबति तद्दुग्धं तावत् पुण्यं प्रवर्धते।।42।।

यो गां पयस्विनीं दद्यात्तरुणां वत्ससंयुताम्।

शिवस्यायतने दत्त्वा दत्तं तेन तु विश्वकम्।।43।।

उक्षाणो वेधसा सृष्टा: सस्यस्योत्पादनाय च।

तैरुत्पादितसस्येन सर्वमेतद्विधार्यते।।44।।

यश्चैतान् पालयेद्यस्नाद्दर्थवेश्चैव यत्नतः।

जगन्ति तेन सर्वाणि साक्षात् स्यु: पालितानि च॥45॥
यावद्गोपालने पुण्यमुक्तं पूर्वमनीषिभिः।
उक्ष्णोऽपि पालेन तेषां फलं दशगुणं भवेत्॥46॥
जगदेतद्धृतं सर्वमनडुद्भिश्चराचरम्॥47॥
वृष एव ततो रक्ष्य: पालनीयश्च सर्वदा।
धर्मोऽयं भूतले साक्षाद् ब्रह्मणा ह्यवतारित:॥48॥
त्रैलोक्यधारणायालमन्नानां च प्रसूतये।
अनादेयानि घासानि विघसन्ति स्वकामत:॥49॥
भ्रमित्वा भूतलं दूरमुक्षाणं को न पूजयेत्।
उत्पादयन्ति सस्यानि मर्दयन्ति वहन्ति च।
आनयन्ति दवीयस्तदुक्षतः कोऽधिको भुवि॥50॥
स्कन्धेन दूराच्च वहन्ति भारमाख्याति पत्युर्न च भारयुक्ताः।
स्वीयेन देहेन परस्य जीवान्पुष्यन्ति रक्षन्ति च वर्धयन्ति॥51॥
पुण्यास्तु गावो वसुधातले या बिभ्रत्यमुं गोवृषगर्भभारम्।
भार: पृथिव्या दशताडिताया एकस्य चोक्ष्णो ह्यपि साधुवाच:॥52॥
एकेन दत्तेन वृषेण येन भवन्ति दत्ता दश सौरभेय्यः।
माहेय्यपीयं धरणीसमाना तस्माद्वृषात् पूज्यतमोऽस्ति नान्यः॥53॥
उत्पाद्य सस्यानि तृणं चरन्ति तदेव भूयः सततं वहन्ति।
न भारखिन्ना: प्रवदन्ति किंचिदहो वृषैर्जीवति जीवलोकः॥54॥
तृतीयेऽब्दे चतुर्थे वा यदा वत्सो दृढो भवेत्।
तदा नासाऽस्य भेत्तव्या नैव प्राग, दुर्बलस्य च॥55॥
नासावेधनकीलं तु खादिरं वाथ गैंशपम्।
द्वादशाङ्गुलकं कार्यं तज्ज्ञैस्तैश्च समं च वा॥56॥
शालां द्विजेन्द्रा वृष गो हयानां
तां याम्यदिग्द्वारवतीं विदध्यात्।
सौम्याककुब्धारवतीं सुशोभां
तेषां शमिच्छन् ध्रुवमात्मनश्च॥57॥
गावो वृषा वा हय-हस्तिनो वा
अन्येऽपि सर्वे पशवो द्विजेन्द्रा:।
याम्यामुखा बोत्तरदिङ्मुखा वा
नान्याशकास्ते खलु बन्धनीयाः॥58॥
शालाप्रवेशे वृष-गो-पशूनां
राजा ऽपि यत्नाद्धय-कुञ्जराणाम्।

होमं च सप्तार्चिषि शास्त्रयुक्तं

कुर्याद्विधिज्ञो द्विजपूजनं च॥59॥

लागलं सम्प्रवक्ष्यामि यत्काष्ठं यत्प्रमाणतः।

हलेषायास्तथोन्मानं प्रतोदस्य युगस्य च॥60॥

चत्वारिंशत्तथा चाष्टावङ्गुलानि कुथः स्मृतः।

अर्धार्धमङ्गुलैर्भाज्यो हलेषावेधतश्च य:॥61॥

षोडशैव तु तस्याध: षड्विंशति तथोपरि।

वेधस्तस्याश्च कर्तव्य: प्रमाणेन षडङ्गुल:॥62॥

अगुलैश्चाष्टभिस्तस्माद्वेध: स्यात् प्रातिहारिकः।

तस्याधस्ताञ्च चत्वारि वेधश्च चतुरङ्गुल:॥63॥

अष्टाङ्गुलमुरस्तस्य वेधादूर्ध्वं प्रकल्पयेत्।

ग्रीवा दशाङ्गुला चोर्ध्वं हस्तग्राही तत: स्मृता॥64॥

साऽपि तज्जै: शुभा कार्या तद्वेधस्त्र्यफूलो भवेत्।

पंचाङ्गुलं पुरस्तस्य शिरसोऽपि विभावनम्॥65॥

पृथुत्वं शिरसो धार्यं हस्ततलप्रमाणकम्।

अगुलानि तथा चाष्टौ उरस: पृथुता भवेत्॥66॥

वेधाद्वहिः प्रतीकारी षट्त्रिंशदगुला भवेत्।

सुतीक्ष्णलोहफलका मृत्काष्ठादिविदारकृत्॥67॥

न सीरं क्षीरवृक्षस्य न बिल्व-पिचुमन्दयोः।

इत्यादीनां हि कुर्वाणो न नन्दति चिरं गृही॥68॥

प्लक्षाक्षयोर्न तत् कुर्यात् कीर्तिघ्नौ तौ प्रकीर्तितौ।

तयो: काष्ठस्य तत् कुर्वन्ससस्यो नश्यति ध्रुवम्॥69॥

प्राञ्जला सप्तहस्ता च चतुरस्राऽग्रवर्तुला।

सालादिशुभकाष्ठानां हलीषा विदुषां मता॥70॥

अस्या वेध: सकर्णाया: कार्यो नववितस्तिभिः।

नीचोञ्चवृषमानेन तज्ज्ञा एवं वदन्ति हि॥71॥

चतुर्हस्तं युगं कार्यं स्कन्धस्थानेऽर्द्धचन्द्रवत्।

मेषशृंग्या: कदम्बस्य सालाद्यन्यतमस्य वा॥72॥

शम्या वेधाद्वहिः कार्या दशाङ्गुलम्॥73॥

प्रतोदश्च समग्रन्थिर्वणवश्च चतुष्करः।

तदने चापि कर्तव्यो यवाकारस्तु लोहजः॥74॥

हीनातिरिक्तं कर्तव्यं नैव किञ्चित् प्रमाणत:।

कुर्यादनडुहोऽदैन्यादैन्यात्तु नरकं व्रजेत्॥75॥

यथा दृढं यथाशोभं वाहकस्य प्रमाणतः।

भूमेश्च कर्षणायालं तज्ज्ञा: सीरं वदन्ति हि।।76।।

योजनं तु हलस्याथ प्रवक्ष्यामि यथा तथा।

ज्येष्ठानक्षत्रसंयुक्ते पुण्येऽन्हि तद्विधीयते।।77।।

अन्यत्र वा शुभे भे च तत्र कार्यं विपश्चिता।

यत्तु कृत्यं हितं वापि पुण्यं वा मनसि स्फुरेत्।।78।।

मातृश्राद्धं द्विज: कुर्याद्यथोक्तविधिना गृही।

द्रव्य-कालानुसारेण कुर्वाणो धर्मत: कृषिम्।।79।।

प्रोल्लिख्य मण्डलं पुष्प-धूप-दीपैः समर्थ्य तत्।

इन्द्राय च तथाऽश्विभ्यां मरुद्भ्यश्च तथा द्विजः।।80।।

कुर्याद्बलिहृतिं विद्वान् उदग्वै कश्यपाय च।

तथा कुमार्ये सीतायै अनुमत्यै तथा बलिः।।81।।

नम: स्वाहेति मन्त्रेण स चेच्छन्नात्मनो हितम्।

दधि-गन्धा-ऽक्षतै: पुष्पैः शमीपत्रैस्तिलैस्तथा।।82।।

दद्याद्बलिं वृषाणां च मध्याज्यप्राशनं तथा।

सघृप्य सीरफालाग्रं हेम्ना व रजतेन वा।।83।।

प्रलिप्य मधु-सर्पिभ्यां कुर्याच्च तत्प्रदक्षिणम्।

अग्न्युक्ष्णोर्मण्डलं कृत्वा कुर्यात्सीरप्रवाहणम्।।84।।

पुण्य लाङ्ल कल्याण कल्याणाय नमोऽस्त्विति।

सीतायाः स्थापनं कृत्वा पराशरमृषि स्मरन्।।85।।

सीरा युञ्जन्ति इत्याद्यैर्मन्त्रैः सीरं प्रवाहयेत्।

दधि-दूर्वा-ऽक्षतै: पुष्पैः शमीपत्रैश्च पुण्यदैः।।86।।

सीतां पूज्य वृषौ भक्त्या रक्तवस्त्रविषाणकौ।

सप्तधान्यानि चादाय प्रोक्ष्य पूर्वामुखो हली।

तानि कृत्वोक्ष्णो: क्षेत्रे च किरन् भूमि कृषेविजः।।87।।

न तिलैर्न यवैर्हीनं द्विज: कुर्वीत कर्षणम्।

तद्विहीनं तु कुर्वाणं न प्रशंसन्ति देवताः।।88।।

तिलपात्रच्युतं तोयं दक्षिणस्यां पतेद्दिशि।

तेन तृप्यन्ति पितरो यावन्न तिलविक्रय:।।89।।

विक्रीणीते तिलान्यस्तु मुक्तवाऽन्यद्धान्यसामकान्।

विमुच्य पितरस्तं तु प्रयान्ति हि तिलैः सह।।90।।

तुषाज्जलं यवस्थं च पात्रेभ्यो भूतले पतत्।

पयो-दधि-घृतायैस्तु तर्पयेत्सर्वदैवता:।।91।।

दैव-पर्जन्य-भू-सीरयोगात् कृषि: प्रजायते।
व्यापारात् पुरुषस्यापि तस्मात्तत्रौद्यतो भवेत्।।92।।
शालीक्षु शण कार्पास वार्ताकप्रभृतीनि च।
वापयेत् सस्यबीजानि सर्वं वापि न सीदति।।93।।
चन्द्रक्षये ऽग्निर्विप्रोयो युनक्ति वृष कचित।
तं पञ्चदशवर्षाणि त्यजन्ति पितरो हितम्।।94।।
चन्द्रक्षये तु योऽविद्वान् द्विजो भुङ्क्ते पराशनम्।
भोक्तुर्मासार्जितं पुण्यं भवेदशनदस्य वै।।95।।
चन्द्रार्कयोस्तु संयोगे कुर्याद्य: स्त्रीनिषेवणम्।
स्यूरेतोभोजनास्तस्य तन्मासं पितरो हता:।।96।।
चन्द्रक्षये तु य: कुर्यात्तरुस्तम्भनिकृन्तनम्।
तत्पर्यसंख्यया तस्य भवन्ति भूणहत्यकाः।।97।।
वनस्पतिगते सोमे योऽध्वानं तु व्रजेविजः।
प्रभ्रष्टद्विजकर्माणं तं त्यजन्त्यमरादय:।।98।।
वासांसीन्दुप्रणाशो यो रजकस्याग्रत: क्षिपेत्।
पिबन्ति पितरस्तस्य मासं वस्त्रमलाम्बु तत्।।99।।
सोमक्षये द्विजो जाति त्यक्त्वा यस्तु हुताशनम्।
स देव-पितृशापागदग्धो नरकमाविशेत्।।100।।
अष्टमी कामभोगेन षष्ठी तैलोपभोगत:।
कुहूश्च दन्तकाष्ठेन हिनस्त्यासप्तमं कुलम्।।101।।
चन्द्राप्रतीतौ पुरुषस्तु दैवादद्यादमत्या यदि दन्तकाष्ठम्।
ताराधिराज: स्वदितस्तु तेन घात: कृत: स्यात्पितृ-देवतानाम्।।102।।
तत्राभ्यज्य विषाणानि गावश्चैव तथा वृषा:।
चरणाय विसृज्यन्ते आगतान् निशि भोजयेत्।।103।।
य उत्पाद्येह सस्यानि सर्वाणि तृणचारिण:।
जगत् सर्वं धृतं यैस्तु पूज्यन्ते किंन ते वृषा:।।104।।
चरणाय विसृष्टं तु यस्य गोदशकं भवेत्।
यद्रूपेण स्थितोधर्म: पूज्यन्ते किं न ते वृषा:।।105।।
स्यु: पाल्या यत्नतस्ते वै वाहनीया यथाविधि।
स याति नरकं घोरं यो वायत्यपालयन्।।106।।
नाऽधिकाङ्गो न हीनाङ्ग: पुष्पिताङ्गो न दूषितः।
वाहनीयो हि शूद्रेण वाहयन्क्षयमश्नुते।।107।।
वर्जयेद्दष्ट्रदोषांश्च वाहने दोहने नर:।

पाल्या वै यत्नत: सर्वे पालयन्च्छुभमाप्नुयात्।।108।।

अन्नार्थमेतानुक्षाण: ससर्ज परमेश्वरः।

अन्नेनाप्यायते सर्वं त्रैलोक्यं सचराचरम्।।109।।

अग्निज्वर्लति चान्नार्थं वाति चान्नाय मारुत:।

गृह्णाति चाम्भसां सूर्यो रसानन्नाय रश्मिभिः।।110।।

अन्नं प्राणो बलं चान्नमन्ननाज्जीवितमुच्यते।

अन्नं च जगदाधारं सर्वमन्ने प्रतिष्ठितम्।।111।।

सर्वेषां देवतादीनामन्नं जीव: प्रकीर्तितः।

तस्मादन्नात्परं तत्वं न भूतं न भविष्यति।।112।।

द्यौः पुमान्धरणी नारी अम्भो बीजं दिवश्च्युतम्।

धु-धात्री-तोयसंगादन्नादीनां हि सम्भवः।।113।।

आपो मूलं हि सर्वस्य सर्वमप्सु प्रतिष्ठितम्।

आपोऽमृतरसो ह्याप आप: शुक्रं बलं महः।।1141।

सर्वस्य बीजमापो हि सर्वमद्भिः समावृतम्।

सद्य आप्यायना ह्याप आपो ज्येष्ठतरा ह्यतः।।115।।

किञ्चित्कालं विनाऽन्नाद्यर्जीवन्ति मनुजादय:।

न जीवन्ति विना ताभिस्तस्मादापोऽमृतंस्मृता:।।116।।

दत्ताभिरद्भिरेतस्यां किं न दत्तं कलौ युगे।

यथान्नेन प्रदत्तेन सर्वं दत्तं भवेदिह।।117।।

अतोऽप्यन्नार्थभावेन कर्तव्यं कर्षणं द्विजैः।

यथोक्तेन विधादेन लाङ्लादि प्रयोजनम्।।118।।

सीते सौम्ये कुमारि त्वं देवि देवार्चिते श्रिये।

शकितसूनोविना सिद्ध तथा मे सिद्धिदा भव।।119।।

शक्तिसूनोविना नाम्ना सीतायाः स्थापनं विना।

विनाऽभ्युक्षणरक्षार्थं सर्वं हरति राक्षस:।।120।।

वापने लवने क्षेत्रे खले गन्त्रीप्रवाहणे।

एष एव विधिर्ज्ञेयो धान्यानां च प्रवेशने।।121।।

देवतायतनोद्यान-निपातस्थान-गोव्रजान्।

सीमा-श्मशान-भूमिं च वृक्षच्छाया क्षितिं तथा।।122।।

भूमिं निखातं यूपांश्च अयनस्थानमेव च।

अन्यामपि हि चाऽवाह्यां न कृरेत्कृषिकृद्धराम्।।123।।

नोषरां वाह्यद्भूमिं न चाऽश्म-शर्करावृताम्।

न गोचरां न प्रदत्तां न नदीपुलिनां तथा।।124।।

यद्यसौ वाह्येल्लोभद्वेषाद्वापि हि मानवः।
क्षीयतेऽसौ चिरात्पापात् सपुत्र-पशु-बान्धवः।। 125।।
नरक घोरतामिस्रं पापीयान् याति निश्चितम्।
योऽपहृत्य परकीयां कृषिकृदाहयेद्धराम्।।126।।
स भूमिस्तेयपापेन सुचिरं नरके बसेत्।
एकसङ्ख्यमपि स्वर्गं भूमिमगुलमात्रिकाम्।।127।।
तथैकामपि गां हत्वा सृष्ट्यन्तं नरकं बसेत्।
न दूरे वाहयेत् क्षेत्रं न चैवात्यन्तिके तथा।।128।।
वाहयेन्न पथि क्षेत्रं वाहयन्दुःखभाग्भवेत्।
क्षेत्रेष्वेवं वृतिं कुर्याद्यामुष्ट्रो नावलोकयेत्।।129।।
न लङ्घयेत्पशु श्वो नभिन्द्याद्यां च शूकरः।
बन्धाश्च यन्नतः कार्या मृगादित्रासनाय च।।130।।
अत्राप्युपद्रवं राज्ञा तस्करादिसमुद्भवम्।
संरक्षेत्सर्वतो यन्नाद्यस्मात् गृह्णात्ययसौ करान्।।131।।
कृषिकृन्मानवस्त्वेवं मत्वा धर्मं कृषेद्धराम्।
अनवद्यां शुभां स्निग्धां जलवगाहनक्षमताम्।।132।।
निम्नां हि बाह्येद्भूमिं यत्र विश्रमते जलम्।
वाहयेत्तु जलाभ्यर्णमवृष्टौ सेकसम्भवः।।133।।
शारद्यभुञ्चकैर्भूमौ कङ्ग्वाद्यं वापयेद्धली।
अधित्यकासु कार्पासं वदन्त्यन्यत्र हैमकम्।।134।।
वासन्तं ग्रीष्मकालीयं वाप्यं स्निग्धेषु तद्विदा।
केदारेषु तथा शालीञ्जलोपान्तेषु चेक्षवः।।135।।
वृन्ताक-शाकमूलानि कन्दानि च जलान्तिके।
वृष्टिविश्रान्तपानीयक्षेत्रेषु च यवादिकान्।।136।।
गोधूमाश्च मसूराश्च खल्या: खलकुशास्तथा।
समस्निग्धेषु वाप्याश्च भूमिजीवान्विजानता।।137।।
तिला बहुविधाश्चोप्या अतसी-शणमेव च।
समस्निग्धेषु वाप्यानि धान्यान्यन्यानि योगतः।।138।।
कुलत्था मुद्रमाषाश्च राजमाषादिकास्तथा।
वाप्या भूमिविशेषे तु भूमिजीवं विजानता।।139।।
मृदम्बुयोगजं सर्वं वापयेत्कृषिकृन्नरः।
सम्पश्येञ्चरत: सर्वान् गोवृषादीन् स्वयं गृही।।140।।
चिन्तयेत्सर्वमात्मीयं स्वयमेव कृषि व्रजेत्।

प्रथमं कृषिवाणिज्यं द्वितीयं पशुपोषणम्॥141॥
तृतीयं क्रीतविक्रीतं चतुर्थं राजसेवनम्।
नखैर्विलिखने यस्याः पापमाहुर्मनीषिणः॥142॥
तस्याः सीरविहारेण किं न पापं क्षितेर्भवेत्।
तृणैकच्छेदमात्रेण प्रोच्यते क्षय आयुषः॥143॥
असङ्ख्यकन्दनि शादसङ्ख्यातं भवेदघम्।
यद्वर्षे मत्स्यबन्धानां तथा सङ्करिणामपि॥144॥
अहः कुक्कुटिकानां च तद्दिने कृषिकारिणाम्।
वधकानां च यत् पापं यत् पापं मृगयोरपि।
कदर्याणां च यत् पापं तद्दिने कृषिकारिणाम्॥145॥
वर्णानां च गृहस्थानां कृषिवृत्त्युपजीविनाम्।
तदेनसो विशुद्ध्यर्थं प्राह सत्यवतीपतिः॥146॥
द्वादशो नवमो वापि सप्तमः पञ्चमोऽपि वा।
धान्यभागः प्रदातव्यो सीरिणा खलके ध्रुवम्॥147॥
अश्मर्यव्यूढभूमौ च विशांशी क्षेत्रभुग्भवेत्।
एकैकांशाय कर्षः स्याद्यावद्दशम-सप्तमौ॥ 148॥
ग्रामेशस्य नृपस्यापि वर्णिभिः कृषिजीविभिः॥149॥
सस्यभागः प्रदातव्यो यतस्तौ कृषिभागिनौ।
ब्राह्मणस्तु कृषिं कुर्वन्वाहयेदिच्छया धराम्॥150।
न किञ्चित् कस्यचिद्दद्यात्स सर्वत्र प्रभुर्यतः।
ब्रह्मा वै ब्राह्मणं चास्यात्प्रभुस्त्वसृजदादितः॥151॥
तद्रक्षणाय बाहुभ्यामसृजत् क्षत्रियानपि।
पशुपाल्याशनोत्पत्त्यै ऊरुभ्यां च तथा विशः॥152॥
द्विजदास्याय पण्याय पद्भ्यां शूद्रमकल्पयत्।
यकिञ्चिज्जगतीहात्र भू-गेहाश्च गजादिकम्॥153॥
स्वभावेन हि विप्राणां ब्रह्मा स्वयमकल्पयत्।
ब्राह्मणश्चैव राजा च द्वावप्येतौ घृतव्रतौ॥154॥
न तयोरन्तरं किञ्चित् प्रजाधर्माभिरक्षणे।
तस्मान्न ब्राह्मणो दद्यात् कुर्वाणो धर्मतः कृषिम्॥155॥
ग्रामेशस्य नृपस्यापि कियन्तमप्यसौ बलिम्।
अथान्यत् सम्प्रवक्ष्यामि कृषिकृच्छुद्धिकारणम्॥156॥
संशुद्धः कर्षको येन स्वर्गलोकमवाप्नुयात्।
सर्वसत्वोपकाराय सर्वयज्ञोपसिद्धये॥157॥

नृपस्य कोशवृद्ध्यर्थं जायते कृषिकृन्नरः।
कुर्यात्कृर्षि प्रयत्नेन सर्वसत्वोपजीविनीम्।।158।।
पितृ-देव-मनुष्याणां पुष्टये स्यात् कृषीवलः।
वयांसि चान्यसत्वानि क्षुत्तृष्णापीडिता: प्रजाः।।159।।
उपयुञ्जन्ति सस्यानि क्षेत्रजातानि नित्यशः।
पुष्ट्यर्थं मुष्टिमेकां वा ददत्पापं व्यपोहति।।160।।
यस्य क्षेत्रस्य यावन्ति सस्यान्यदन्ति प्राणिनः।
तावन्तोऽपि विमुच्यन्ते पातकात् कृषिकारका:।।161।।
कृताग्निकार्यदेहोऽपि ब्राह्मणोऽन्यतमोऽपि वा।
आददान: परक्षेत्रात् पथि गच्छन्न लिप्यते।।162।।
क्षेत्रो विमुच्यते दोषात् नियतं कृषिसम्भवात्।
गृहीतं क्षेत्रिणो धान्यं निवेदयति वाण्वपि।।163।।
अनिवेदिते तदर्धं स्यात् पातकं कर्षकस्य च।
भावशुद्धावतो धर्मो ह्यनेन तद्विशोधयेत्।।164।।
मुष्टिं तु कल्पयन्धान्यं सर्वपापं व्यपोहति।
यत्किञ्चिदर्थिने दद्याद्भिक्षामात्रं च भिक्षवे।।165।।
अन्नं सुसंस्कृतं वापि तेन सीरी विशुद्ध्यति।
सीतायज्ञं च य: कुर्यात् सिद्धसस्ये खलागते।।166।।
अनन्तकृतपापोपि मुक्तो भवति कर्षक:।
खलयज्ञं प्रवक्ष्यामि तत्कुर्वाणां द्विजातयः।।167।।
विमुक्ता: सर्वपापेभ्य: स्वर्गीकिस्त्वमवाप्नुयुः।
चतुर्दिक्ष् खले कुर्यात्प्राच्यमतिघनावृतिम्।।168।।
सेकद्वारं पिधानं च विद्ध्याञ्चैव सर्वत:।
खरोष्ट्राजोरणांस्तत्र विशतस्तु निवारयेत्।।169।।
श्व-शूकर-शृगालादिकाकोलूक-कपोतकान्।
त्रिसन्ध्यं प्रोक्षणं कुर्यादानीताभ्युक्षणाम्बुभि:।।170।।
रक्षां च भस्मना कुर्याज्जलधाराभिरक्षणम्।
त्रिसन्ध्यमर्चयेत्सीतां पाराशरमृषि स्मरन्।।171।।
प्रेत-भूतादिनामानि न वदेञ्च तदग्रत:।
सूतिकागृहवत्तत्र कर्तव्यं परिरक्षणम्।।172।।
हरन्त्यरक्षितं यस्माद्रक्षांसि सर्वमेव हि।
प्रशस्तदिनपूर्वाह्न नापराह्न न सन्ध्ययो:।।173।।
धान्योन्मानं सदा कुर्यात् सीतापूजनपूर्वकम्।

यजेत खलभिक्षाभि: काले रोहिण एव हि।।174।।
भक्त्या सर्वं प्रदत्तं हि तत्समस्तमिहाक्षयम्।
खलयज्ञे दक्षिणैषा ब्राह्मणा निर्मिता पुरा।।175।।
भागवेयमयीं कृत्वा तां गृह्णन्त्वीह मामिकाम्।
शतक्रत्वादयो देवा: पितर: सोमपादय:।।176।।
सनकादिमनुष्याश्च ये चान्ये दक्षिणाशूना:।
एतानुद्दिश्य विप्रेभ्यो प्रदद्यात् प्रथमं हली।।177।।
विवाहे खलयज्ञे च सङ्क्रान्तौ ग्रहणेषु च।
पुत्रे जाते व्यतीपाते दत्तं भवति चाक्षयम्।।178।।
अन्येषामर्थिनां पश्चात्कारुकाणां तत: परम्।
दीनानामप्यनाथानां कुष्ठिनां कुशरीरिणाम्।।179।।
क्लीबा-ऽन्ध-बधिरादीनां सर्वेषामपि दीयते।
वर्णानां पतितानां च दद्भुक्तानि तर्पयेत्।। 180।।
चाण्डालांश्च श्वपाकांश्च प्रणात्युञ्चावचांस्तथा।
ये केचिदागतास्तत्र पूज्यास्तेऽतिथिवट्विजा:।।181।।
स्तोकश: सीरिभि: सर्वैर्वर्णिभिहमेधिभिः।
दत्वा सूनृतया वाचा क्रमेणाथ विसर्जयेत्।।182।।
तत्कृत्वा स्वगृहं गत्वा श्राद्धमाभ्युदयं चरेत्।
शरद्धेमन्त-वासन्त-नवान्नै: श्राद्धमाचरेत्।।183।।
नो ऽदत्वान्न तद्श्नीयादश्नं श्चेदघमश्नुते।
कृषावुत्पाद्य धान्यानि खलयज्ञं समाप्य च।।184।।
सर्वसत्वहिते युक्त इहामुत्र सुखी भवेत्।
कृषेरन्यत्र नो धर्मो न लाभ: कृषितोऽन्यत:।।185।।
सुखं न कृषितोऽन्यत्र यदि धर्मेण वर्तते।
अवस्रत्वं निरन्नत्वं कृषितो नैव जायते।।186।।
अनातिथ्यं च दुःखित्वं गोमतो न कदाचन।
निर्धनत्वमसत्यत्वं विद्यायुक्तस्य कर्हिचित्।।187।।
अस्थानित्वमभाग्यत्वं न सुशीलस्य कर्हिचित्।
वदन्ति मुनयः केचित् कृष्यादीनां विशुद्धये।।188।।
लाभस्यांशप्रदानं च सर्वेषां शुद्धिकृद्भवेत्।
प्रतिग्रहात् चतुर्थांशं वणिग् लाभात् तृतीयकम्।।189।।
कृषितो विंशतिं चैव ददतो नास्ति पातकम्।
राज्ञो दत्वा च षड्भागं देवतानां च विंशकम्।।190।।

त्रयस्त्रिंशंच विप्राणां कृषिकर्मा न लिप्यते।।
कृष्या यथोत्पाद्य यवादिकानि
मुक्तो गृहस्थोऽपि पराशरः प्राक् तस्या मया कश्चिद्वादि शेषः।।191।।
देवा मनुष्याः पितरश्च सर्वे
साध्याश्च यक्षाश्च सकिन्नराश्च।
गावो द्विजेन्द्राः सह सर्वसत्वैः
कृष्यन्नतृप्तानि मनाक् करोति।।192।।
यश्चैतदालोच्य कृषि विदध्यात्
लिप्येन्न पापेन स भूभवेन।
सीरेण तस्यातिविदारितापि
स्याद्भूतधात्री वनदानदात्री।।193।।
षट्कर्माणि कृषि ये तु कुर्युर्ज्ञात्वा विधिं द्विजाः।
तेऽमरादिवरप्राप्ताः स्वर्गलोकमवाप्नुयुः।। 194।।
षट्कर्मभिः कृषिः प्रोक्ता द्विजानां गृहमेधिनाम्।
गृहं च गृहणीमाहुस्तद्विबाहो मयोच्यते।।195।।
यो गां पयस्विनीं दद्यात्तरुणां वत्ससंयुताम्।
शिवस्यायतने दत्वा दत्तं तेन तु विश्वकम्।।[35]

अनन्तरं वृषभस्य महत्वं प्रतिपादितम्। वृषभं गोसंरक्षणं न सम्भवति।
अनेन प्रकारेण स्मृतिग्रन्थेषु गवां महत्वं बहुधा बहुभिः प्रकारैः प्रकटितम्। प्रबन्धस्य कलेवर संरक्षणाय संक्षेपेण ते विषयाः अत्र निरूपिताः।

यास्कस्य निरुक्ते गोतत्त्वविमर्शः

सर्वतन्त्रस्वतन्त्रः निर्वचनशास्त्रं प्रवर्तकः श्रीयास्काचार्यः निरुक्तशास्त्रस्य प्रणेता वर्तते। निरुक्तमिदं निर्वचनं शास्त्रनाम्ना च प्रसिद्धम्। अस्मिन् निरुक्ते श्रीणि काण्डानि नैघण्टुकनैगम दैवतसंज्ञकानि द्वादश चाध्यायाः राजन्ते। निरुक्तस्य प्रथमेकाण्डे गोशब्दस्य विस्तृतं निर्वचनं ग्रन्थकारेणाभाणि। तत्रैव गौरिति पृथिव्यानामधेयम्। सूर्यरश्मयोऽपि गावः उच्यन्ते। चन्द्ररश्मयो गावो भवन्ति। धनुषः ज्या च गौरिति। रथेषु संलग्ना चर्ममयरज्जवोऽपि तथैव। एतत् सर्वं पुरस्तादेव निरूपितम्। यास्काचार्यस्य निर्वचनं शास्त्रं भाषाविज्ञानस्य सर्वं रहस्यं उद्घाटयति। विशिष्ट देशभेदेन कस्य शब्दस्य कोऽर्थः कथं तत्र एष व्यवहारः प्रचलति तत् सर्वं सप्रमाणं ब्रूते। गौरिति पृथिव्याः नामधेयम् यद्रं गता भवति यच्चास्यां भूतानि गच्छन्ति। यास्कस्य निरुक्ते गोर्विकारस्य च कृते गोशब्दस्य प्रयोगः श्रूयते। किं बहुना शब्दः यस्मिन् रूपे अस्माकं समक्षे भवति तथैव आसीत् अथवा अस्य शब्दस्य पुरा काले अन्यत् स्वरूपमासीत् कथमद्य अनेन प्रकारेण व्यवहारः इति सर्वं आचार्येण समुपबृंहितम्। एतत् सर्वं तथ्यं प्रबन्धे पूर्वमेव प्रकटीकृतम्। यास्कस्य शास्त्रमिदं सर्वशास्त्रोपकारकम् अस्ति
उक्तच -

तदिदं विद्यास्थानं व्याकरणस्य कात्स्न्य म्।[36]
व्याकरणस्य च पूरकमिदं निरुक्तं इति वक्तव्यम्।

वेदाङ्गेषु गोतत्वविमर्श:

वेदाङ्गानि षट् विद्यन्ते। तत्र प्रमुखे वेदाङ्गे व्याकरणे अष्टाध्याय्यां स्वाचित सूत्रमाध्यमेन गोतत्वस्य चर्चा प्राप्यते। भगवान् पतञ्जलि: शब्दानुशासने शब्दतत्व विचार प्रसंगे गोशब्दस्यादौ विचारं कृतवान्।

यथायाह अत्र गौरिति क: शब्द:

येनोच्चारितेन सास्नालामुलककुत् खुरविषाणानां सम्प्रत्ययो भवति स शब्द:।[37] अत्र गोशब्दस्य गौत्वम् इति।

यथा सनातनधर्मे समग्रे विश्वस्य भूभागे गौ: अतिशयेन पूज्या वर्तते तथैव अस्य वाचको गो शब्द: शब्दराशीषु अतिशयेन मानार्हः सन्ति अनेके शब्दा: परन्तु भगवतापतञ्जलिना सर्वप्रथमं गौशब्द: उदाहृतः। अवश्यमेव अस्मिन् भौतिके जगति यथाऽयं शब्द: श्रेष्ठ: तथैव अमुष्मिंल्लोके च अक्षयफलप्रदः। दानमाहात्म्ये गोदानस्य महत्वं को न जानाति। अष्टाध्यायां तावत् सूत्राणां परीक्षणं कुर्म: कुत्र गोशब्दस्य समावेश: कृत:।

'गवाश्वप्रभृतीनि च'[38]

द्वन्द्वसमासप्रकरणे सूत्रमिदं पठितम्। यथोच्चारितानि साधूनि स्युः। अयमर्थ: गणपाठे पाणिनिना यथा पठितानि तथैव साधूनीत्यर्थः। गवाश्वम्।

'गवियुधिभ्यां स्थिर:'[39] अलुक्समास प्रकरणे सूत्रमिदं पठितम्।

आभ्यांस्थिरस्य सस्य ष: स्यात्। गविष्ठिरः। अत्र गवीति वचनादेवालुक्।

'गो: पदान्ते'[40] वैदिकीप्रक्रियायां सूत्रमिदम्। विद्मा हित्वा गोपतिं शूर गोनाम्।

'गोचर संचरवहव्रजव्यजापणनिगमाश्च'[41] उत्तरकृदन्तप्रकरणे सूत्रमिदम्।

घान्ता निपात्यन्ते।

'गोपयसोर्यत'[42]

'गोपुच्छा'[43]

तद्धिते ठगाधिकारे सूत्रमिदम्। गौपुच्छिकः।

'गोयवाग्वोश्च'[44] साल्वावुञ्। साल्वको गौः।

'गोरतद्धितलुकि'[45]

'गोविडालसिंहसौन्धवेषूपमाने'[46] गोविडाल:। गवाकृत्या सन्निवेशितं धान्यं धान्यगवशब्देनोच्यते।

'गोश्चपुरीषे'[47] गो: पुरीषम् गोमयम्।

'गोपदादिभ्योवुन्'[48] गोपदकः।

'गोष्ठात् खञ् भूतपूर्वे'[49]

गोष्ठो भूतपूर्व: गौष्ठीनो देश:।

'गोष्पदं सेविता सेवितप्रमाणेषु'[50]

समासाश्रयप्रकरणे सूत्रमिदं पठितम्। सुट् सस्य षत्वं च निपात्यते। गाव: पद्यन्तेस्मिन्देशे स गोभि: सेवित: गोष्पद:। प्रमाणे गोष्पदमात्रं क्षेत्रम्।

'गोस्त्रियोरुपसर्जनस्य'[51] अव्ययीभावप्रकरणे सूत्रमिदम्। उपसर्जनं यो गोशब्द: स्त्रीप्रत्ययान्तं च तदन्तस्य प्रातिपदिकस्य ह्रस्व: स्यात्।

'गौ: सादसादिसारथिषु'[52]

गौसाद:। गौसादि:। गौसारथिः।

एतानि सूत्राणि सन्ति। अनन्तरं वार्तिकेषु गोशब्दविषये किञ्चिदुक्तं

तद्विचार्यते -

'गवादिषु विन्दे: संज्ञायाम्'[53] गोविन्द:

'गवि च युक्ते'[54] गोशब्दे परे युक्त इत्यर्थे गम्येऽष्टन् आत्वं वक्तव्यम्।

अष्टागवं शकटम्।

'गोरजादिप्रसंगे यत्'[55]

गव्यम्।

'गौएँतौ छन्दस्युपसंख्यानम्'[56]

गव्यूतिः।

'गोष्ठजादय: स्थानादिषु पशुनामभ्य:'[57]

गवां स्थानम् गोष्ठम्।

उणादिप्रकरणे गोशब्दस्य कृते एकमपि सूत्रं नास्ति।

फिट् सूत्रे एकं सूत्रमुपलभ्यन्ते –

'गोष्ठजस्य ब्राह्मणनामधेयस्य'[58]

पाणिनीयव्याकरणे एतेषु स्थलेषु गोशब्दस्य बह्वत्र प्रयोग: प्राप्यते। छन्द: पादौ तु वेदस्य। छन्द: शास्त्रे क्वचित् गोशब्दस्य प्रयोगो दृश्यते। कल्पशास्त्रं विस्तृतं वर्तते। श्रौतभोग गोतत्वस्य अनेकत्र प्रसंग:। दक्षिणायां सर्वत्र विमर्श: भवति। दर्शयागे च दुग्धप्राप्त्यर्थं अस्या: प्रयोगो भवति। प्रायश्चित् प्रकरणे च गोतत्वस्य विशिष्टं महत्वं भवति। गृहस्य सूत्रेषु च बहुत्र प्रयोगः।

शुल्बसूत्रे प्रायेण अस्योपयोग: नास्ति। धर्मसूत्रेषु विशिष्टं व्याख्यानं उपलभ्यते।

ज्योतिषशास्त्रे क्वाचित्क: प्रयोगः। तत्रापि शकुनभागे दृश्यते। यत्र पशुपक्षीणां दर्शनं मंगलायकल्याणाय च प्रदर्शितम्। ग्रहदोष निवारणाय च कुत्रचित् प्रयोगः।

इदं तथ्यं सत्यमस्ति यदि वेदाङ्गानामेव केवलमध्ययनं भवेत् अवश्यमेव सम्पूर्णं शोधकार्यं तत्रैव पूर्यत किन्तु अस्य प्रबन्धस्य सन्ति अनेके प्रविभागा:। तस्मात् महत्वपूर्णस्य विषयस्य सप्रमाणं चिन्तनं क्रियते।

प्रमाणस्य विषये पौराणिक साहित्यस्य एतस्मिन् विषये अध्ययनं आवश्यकं वर्तते। गोतत्त्वस्य विमर्शस्य विषये पुराणेषु अनेकानेकत्वेन विमर्श: प्रस्तूयन्ते। तेषां वर्णनम् तृतीयाध्याये वायुपुराणेव, पद्मपुराणे, अग्निपुराणे, ब्रह्मपुराणस्य विषयवस्तु ग्रहणम् कृतम्।

सन्दर्भग्रन्थाः –


1. मनुस्मृति: - 2.10
2. मनुस्मृति: - 1.102
3. याज्ञवल्क्यस्मृति: - 1.1
4. मनुस्मृति: - 2.6
5. मनुस्मृति: - 2.246
6. मनुस्मृति: -2.245
7. मनुस्मृति: - 3.29
8. मनुस्मृति: - 4.39
9. मनुस्मृति:- 4.58
10. मनुस्मृति: - 4.59
11. मनुस्मृति: - 4.162
12. मनुस्मृति: - 4.209
13. मनुस्मृति: - 4.231
14. मनुस्मृति:-5.8

15. मनुस्मृतिः - 5.124
16. मनुस्मृतिः-5.141
17. मनुस्मृति; - 8.88
18. मनुस्मृतिः - 8.98
19. मनुस्मृतिः - 8.113
20. मनुस्मृतिः - 8.231
21. मनुस्मृतिः - 8.242
22. मनुस्मृतिः - 8.296
23. मनुस्मृतिः - 11.54 मन्वर्थ मुक्तावली
24. मनुस्मृतिः - 11.79 २
25. मनुस्मृतिः - 11.91
26. मनुस्मृतिः - 11. 108-115
27. मनुस्मृतिः - 11.194-196
28. मनुस्मृतिः - 11. 212
29. पराशरस्मृतिः- 2.2
30. पराशर स्मृति 2.3-5
31. पराशर स्मृतिः 8. 1-2
32. पराश स्मृतिः तत्रैव
33. बृहत्पराशरस्मृतिः- 5.2
34. वृहत्पराशरस्मृतिः - 5.10
35. वृहत्पराशरस्मृतिः - 5.1-43
36. अध्याये
37. महाभाष्यम् परस्पशांगिकम्
38. अष्टाध्यायी - 2.4.1
39. अष्टाध्यायी - 8.3.95
40. अष्टाध्यायी - 7.1.57
41. अष्टाध्यायी- 3.3.119
42. अष्टाध्यायी - 4.3.160
43. अष्टाध्यायी - 4.4.6
44. अष्टाध्यायी - 4.2.136
45. अष्टाध्यायी - 5.4.92
46. अष्टाध्यायी - 6.2.72
47. अष्टाध्यायी - 4.3.145
48. अष्टाध्यायी - 5.2.62
49. अष्टाध्यायी - 5.2.18
50. अष्टाध्यायी - 6.1.145
51. अष्टाध्यायी - 1.2.48
52. अष्टाध्यायी - 6.2.41
53. वार्तिकम्
54. वार्तिकम्
55. वार्तिकम्
56. वार्तिकम्
57. फिट् सूत्रम्
58. फिट सूत्रम्